*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 5, May - June 2026*

# महाकविकालिदासविरचिता कुमारसंभवमहाकाव्ये गुणवादस्य समीक्षा पर्यालोचनम्

***Smt. Soma Mishra***

*Research Scholar, RKDF University, Ranchi*

**सारांश**

गुण्यते, मन्त्र्यते, मन्त्रणादिभिः निश्चीयते इति गुणः। अर्थात् 'गुण्' धातोः 'मन्त्रणे' अर्थे यण्-प्रत्ययेन गुणशब्दः निष्पद्यते। पाणिनिना स्वीयाष्टाध्याय्यां गुणः संज्ञात्वेन स्वीकृतः। साहित्यशास्त्रस्य गुणाः माधुर्यादयः इति कथ्यन्ते। भामहेन माधुर्य-ओजः-प्रसादाख्याः गुणाः उल्लिखिताः। श्रवणमधुरशब्दप्रयोगः लघुसमासाश्च माधुर्यगुणं व्यञ्जयन्ति। कर्णकटुशब्दप्रयोगः दीर्घसमासयुक्तपदानि च ओजोगुणः। काव्यपठनमात्रेण शीघ्रार्थप्रतिपत्तिः समासाभावश्च प्रसादगुणः।

महाकविकालिदासविरचिते कुमारसम्भवमहाकाव्ये गुणवादस्य समीक्षायां प्राचीनभारतीयचिन्तकैः षष्टिः गुणाः राजनीतिक्षेत्रे चर्चिताः, किन्तु काव्यशास्त्रे मम्मटभट्टाद्याचार्यैः माधुर्य-ओजः-प्रसादाख्याः त्रय एव गुणाः प्रधानतया स्वीकृताः। पण्डितराजजगन्नाथमते द्रुत्यादिचित्तवृत्तयः एव गुणाः, याः रसकार्यरूपाः सन्ति। कालिदासः स्वकाव्ये श्रव्यत्वं, श्रुतिसुखदत्वं, समतां, माधुर्यं च निश्चितगुणरूपेण स्वीकरोति।

माधुर्यगुणस्य व्यञ्जिका रचना टवर्गवर्जिता, मृदुवर्णबहुला, असमासा वा भवति। तस्योदाहरणं षष्ठसर्गे (1/6) 'अध्यापितस्योशनसापि नीतिम्' इत्यत्र दृश्यते। ओजोगुणस्य व्यञ्जिका रचना टवर्गबहुला, दीर्घसमासात्मिका, वीररसप्रधाना च। तस्योदाहरणं प्रथमसर्गे (1/1) 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति श्लोकः। प्रसादगुणः सर्वसाधारणः, यत्र श्रवणमात्रेणार्थबोधः स्पष्टो भवति। तस्योदाहरणं प्रथमसर्गे (1/9) 'प्रसीद विश्राम्यतु वीर वज्रं' इत्यत्र तथा द्वितीयसर्गे (2/2) 'अवधानपरे चकार सा' इत्यत्र चोपलभ्यते।

महाकविकालिदासविरचिते कुमारसम्भवमहाकाव्ये गुणानां प्रयोगः काव्यशास्त्रीयपरम्परानुगुणम् अत्यन्तं स्वाभाविकः कलात्मकश्च अस्ति। कवेः शैल्यां माधुर्य-ओजः-प्रसादानां त्रयाणामपि गुणानां रसभावानुकूलं सन्निवेशं कृत्वा काव्यस्य आन्तरङ्गिकशोभा द्विगुणिता कृता अस्ति, यत् कालिदासस्य सार्वभौमकाव्यशिल्पस्य परिचायकम्।

**सूचकशब्दः-** माधुर्यगुणस्य, ओजगुणस्य, प्रसादागुणस्य, रसभावानस्य, सार्वभौमकाव्यशिल्पस्य।

## महाकविकालिदासविरचिता कुमारसंभवमहाकाव्ये गुणवादस्य समीक्षा पर्यालोचनम्

गुण्यते, मन्त्र्यते, मन्त्रणादिभिः निश्चीयते इति गुणः। अर्थात् 'गुण्' धातोः 'मन्त्रणे' अर्थे यण्-प्रत्ययेन गुणशब्दः निष्पद्यते। पाणिनिना स्वीयाष्टाध्याय्यां गुणः संज्ञात्वेन स्वीकृतः। प्राचीनभारतीयचिन्तकैः राजनीतिक्षेत्रे षष्टिः गुणाः चर्चिताः।

संधिविग्रहयानासनद्वैधाश्रयाः धनुषः प्रत्यञ्चा च गुणः उच्यते। रज्जुरपि गुणः उच्यते। अयं गुणशब्दः सूत्रस्यापि वाचकः। आर्यसप्तशत्याम् एकम् उत्कृष्टं पद्यं गुणस्य द्वावर्थौ व्याख्याति।

**गुणवन्तोऽपि सीदन्ति न गुण ग्राहको यदि।**
**सगुणोऽपि पूर्वकुम्भो यथा कूपे निमज्जति ॥**

एष गुणः भारतीयदर्शनेऽपि अभिलक्षितो भवति। प्रायः सर्वाणि आस्तिकदर्शनानि गुणानां स्वरूपं विचारितवन्ति। न्यायदर्शने प्रत्यक्षप्रमितिस्थले विशेषणविशेष्यसहभूतः सन्निकर्ष एव गुण इत्युक्तः। अनुमितौ परामर्शो गुणः, उपमितौ सादृश्यज्ञानं गुणः, शाब्दबोधे योग्यताज्ञानं तात्पर्यज्ञानं वा गुणत्वेन मतम्। महर्षिकणादानुसारं द्रव्याश्रितत्वं, निर्गुणत्वं, निष्क्रियत्वं च गुणस्य लक्षणम्। श्रीविश्वनाथपञ्चाननोऽपि एतदेव गुणलक्षणं स्वीकरोति – 'अथ द्रव्याश्रिताः श्रेयाः निर्गुणाः निष्क्रियाः गुणाः' इति। द्रव्यकर्मभ्यां भिन्नः यः सामान्यपदार्थः, स गुण इत्युच्यते। द्रव्यगुणकर्मसु एतेषु त्रिषु पदार्थेषु जातिः सामान्यं वा स्वीक्रियते।

प्रायः सर्वे आचार्याः काव्ये शब्दार्थयोः गुणसद्भावस्य अनिवार्यतां स्वीकुर्वन्ति। "सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्" इति सर्वेषां मतम्। किन्तु अलङ्काराणाम् अनिवार्यता सर्वैः न स्वीक्रियते। "तददोषौ शब्दार्थौ सगुणावनलङ्कृतौ पुनः क्वापि" इति।

मम्मटस्य इदं काव्यलक्षणम् एतं तथ्यं ध्वनयति। गुणाः काव्यात्मकरसस्य अचलधर्माणः सन्ति, गौणरूपेण च ते शब्दार्थयोरपि धर्माः भवन्ति। तात्पर्यम् – यैः शब्दैः अर्थैश्च काव्यं सम्पद्यते, तेषु गुणस्थितिः अनिवार्या। विश्वनाथः आपत्तिं करोति – काव्यलक्षणे 'सगुणौ' इति वचनं न युज्यते, यतः गुणानां सद्भावे काव्यस्य उपादेयता वर्धते, असद्भावे च उपादेयता ह्रसति; फलतः गुणानां सम्बन्धः काव्यस्वरूपेण न भवति। यथा – 'अयं विद्वान् मनुष्य अस्ति' इति वाक्ये मनुष्ये 'विद्वान्' इति विशेषणं तस्य विद्वत्तागुणस्य द्योतकम्। गुणैः सद्भिः एव कस्यचित् मनुष्यस्य आदरः सभायां पूजा च भवति; गुणहीनस्तु मूर्ख इति उच्यते, स समाजे आदरपात्रः न भवति। अतः विद्वत्तारूपगुणः मनुष्यजीवने सहायकः सन् आदरसत्कारस्य कारणं भवति, न तु मनुष्यत्वाय अनिवार्यः। तस्मात् काव्यलक्षणे 'सगुणौ' पदस्य मम्मटकृतः प्रयोगः (उपन्यासः) अनुचितः। किन्तु विश्वनाथस्य इयं आपत्तिः तात्परिकी नास्ति, यतः काव्यलक्षणं किमपि वैज्ञानिकं लक्षणं न भवति, अपितु काव्यस्य सामान्यं विवरणम्; अनेन च इदं स्पष्टीभवति यत् काव्याय गुणसम्पदः सद्भावः निश्चितरूपेण आवश्यकः। वाल्मीकिरामायणे गीतमाधुर्यं तस्य आवश्यकगुणत्वेन मतम्।

कुमारसम्भवेऽपि कालिदासः श्रव्यत्वं श्रुतिसुखदत्वं समता माधुर्यं च काव्यरचनायाः निश्चितगुणरूपेण स्वीकरोति। "काव्यं श्रुतिसुखं चैव पावनं शीलवर्धनम्" इति। शौर्यं दयालुता इत्यादयो गुणा न मनुष्यस्य शरीरेण सह वर्तन्ते, अपि तु तस्य आत्मना सहैव। अतिकृशकायोऽपि पुमान् वीरताया विशिष्टानि कर्माणि सम्पादयति, यतः तस्य आत्मनि शौर्यं व्याप्तं भवति। काव्येऽपि तथैव। शब्दार्थौ काव्यस्य शरीरम्। रसस्तु आत्मस्थानीयः। स एव काव्ये मुख्यः, गुणाश्च मुख्यरसस्य धर्माः। तेन सह तेषां साक्षात्सम्बन्धः। एवं काव्यशोभाया उत्कर्षाधायका गुणाः काव्यस्यान्तरङ्गधर्मा भवन्ति। न तत् काव्यं विद्यते यस्मिन् गुणाः क्वचिदपि न स्युः। निर्गुणकाव्यस्य कल्पनाप्यसम्भवा।

इदमपि भवान् पूर्वं ज्ञातवान् यत् मम्मटमतानुसारेण पण्डितराजः गुणानां रसधर्मत्वं न स्वीकरोति । पण्डितराजस्तु गुणाः रसस्य कार्यरूपाः सन्ति इति मन्यते । पण्डितराजमते तु द्रुत्यादि चित्तवृत्तिप्रयोजकत्वम् एव माधुर्यादीनां गुणानां विद्यते । स्पष्टं जातम् यत् प्रयोजकतासम्बन्धेन द्रुत्यादिचित्तवृत्तयः एव गुणाः सन्ति । एताः चित्तवृत्तयः यदा रसादिभिः सह सम्बन्धं स्थापयन्ति तदा ताः एव गुणनाम्ना कथ्यन्तो। एवं शब्दे, अर्थे, रसे, रचनायाम् एतेषु सर्वेषु प्रयोजकतासम्बन्धेन स्थिताः द्रुत्यादयः चित्तवृत्तयः एव

माधुर्यादयः गुणाः सन्ति। एताः द्रुति-दीप्ति-विकासात्मिकाः चित्तवृत्तयः एव क्रमशः माधुर्यम्, ओजः, प्रसादः इत्याख्याः गुणाः कथ्यन्ते। रसाश्च तेषां प्रयोजकाः सन्ति। एवमेव वर्णः, शब्दः, अर्थः, रचना अपि आसां चित्तवृत्तीनां प्रयोजकाः सन्ति । अतस्तत्रापि प्रयोजकतासम्बन्धेन गुणाः तिष्ठन्ति । एतेषां त्रयाणां द्रुत्यादिचित्तवृत्तिस्वरूपाणां माधुर्योजः प्रसादानां गुणानां रचनास्वरूपं सोदाहरणं पठिष्यति ।

१. **माधुर्यस्य व्यञ्जिका रचनाः-** गुणानां विवेचनप्रसङ्गे "अतस्त्रय एव गुणाः" इति मम्मटभट्टादयः, इति कथयन् पण्डितराजः "माधुर्योजः प्रसादाख्यास्त्रयस्ते न पुनर्दश" इति मम्मटमतमेव स्वीकरोति गुणानां संख्याविषये। तेषां गुणानां व्यञ्जकता वर्णेषु, समासे, रचनायां च तिष्ठति इति प्रतिपादयति मम्मटाचार्यः। यथा "वर्णाः समासो रचना तेषां व्यञ्जकतामिताः" इति (काव्यप्रकाशः ८/७३) तेषां माधुर्यादीनां गुणानाम् अभिव्यञ्जिकायाः रचनायाः किं स्वरूपं भवेत् इति दर्शयति पण्डितराजः ।

**मधुररचनायाः लक्षणं गुणानामभिव्यञ्जिका रचना चः-** तत्र प्रथमतया माधुर्यस्य गुणस्य व्यञ्जिकाया रचनायाः स्वरूपं प्रतिपादयति जगन्नाथः । तद्यथा- 'सा एव रचना माधुर्यस्य व्यञ्जिका भवति, यस्यां रचनायां टवर्गस्य (ट, ठ, ड, ढ) वर्णानां प्रयोगो न भवेत्' । या च रचना टवर्गभिन्नानां कवर्ग-चवर्ग-तवर्ग-पवर्गाणां प्रथम-तृतीयवर्णैः (क-ग-च-ज-त-द-प-ब एभिः वर्णैः) तथा च शर् प्रत्याहारस्य (श-ष-स) वर्णैः, अन्तस्थैः (यणोऽन्तस्थाः) यण् प्रत्याहारस्थैः (यवरल) वर्णैः संघटिता भवति, सा माधुर्य गुणमभिव्यनक्ति। 'एवं माधुर्यगुणस्य व्यञ्जिकायां रचनायां क-ग-च-ज-त-द-प-ब-श-ष-स-य-व-र-ल-एषां वर्णानां प्रायशः प्रयोगः भवति ।

एतदतिरिक्तं समीपतया प्रयुक्तैः अनुस्वार-परसवर्ण-शुद्धानुनासिकैः वर्णैः माधुर्यस्य रचना व्यञ्जिता भवति। शुद्धानुनासिकैरिति पदेन वर्गाणां पञ्चम-ङ-ञ-ण-न-मवर्णानां बोधो भवति । अत्र टवर्गस्थवर्णानां यद्यपि ग्राह्यता नास्ति, तथापि टवर्गस्थः पञ्चमः वर्णः णकारस्तु शुद्धानुनासिकतया गृहीतः वर्तते ।

**उदाहरणश्लोकौ तद्व्याख्यानं लक्षणसमन्वयश्चः-** माधुर्यगुणव्यञ्जिकाया रचनायाः कुमारसम्भवमहाकाव्ये प्रथमम् उदाहरणम् - यथा –

**अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते ।**

**कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः ॥**[1]

अस्मिन् श्लोके 'माधुर्य' गुणः प्रधानः। माधुर्यगुणो नाम यत्र शब्देषु मधुरता, कोमलता, सरसता च वर्तते, स शृङ्गाररसायावश्यकः मन्यते। अत्र भोजपत्रेषु सिन्दूरादिगलनेन बद्धान् रक्तबिन्दून् 'विद्याधरसुन्दरीणां प्रेमपत्रलेखन' इति योजयित्वा सौम्यं रोचकं कामपूर्णं (शृङ्गारिकम्) च चित्रणम् अकारि। 'अनङ्गलेखक्रिययोपयोगम्' इत्यादिपदैः शृङ्गाररसस्य व्यञ्जना भवति। भाषायां कोमलता चित्ताकर्षकवर्णनं चास्ते, यत्प्रसादादोजसो वा गुणादधिकं माधुर्यगुणं प्रकटयति। अतः माधुर्यगुणः प्रधानम्।

२. **ओजसो व्यञ्जिका रचना तदुदाहरणञ्चः-** 'यथा माधुर्यगुणस्य अभिव्यञ्जिकायां रचनायां के के वर्णाः कीदृशाः समासादयश्च अपेक्ष्यन्ते, इति अत्रैव दृष्टवान्, तथैव ओजोगुणस्य रचनायां के के वर्णाः, कीदृशाः समासादयश्च तद्गुणाभिव्यञ्जने साधकाः भवन्ति ? इति इदानीं सोदाहरणं पठिष्यति। यथा-

**ओजस्विरचनाया लक्षणम्-** ओजस्वि रचना टवर्गवर्णबहुला, भवति । एषा रचना जिह्वामूलीय उपध्मानीय-विसर्ग-सकारवर्णभूयिष्ठा भवति । ओजस्विरचना कवर्ग-चवर्ग-तवर्ग-पवर्गाणां निकटप्रयुक्तैः द्वितीय-चतुर्थवर्णैः संघटिता भवति । एषा रचना नैकट्येन प्रयुक्तै झय् रेफान्यतर घटित संयोगपरह्रस्वैः वर्णैः आलिङ्गिता भवति । वीरादौ अस्य गुणस्य प्राधान्यं भवति । एषा रचना दीर्घसमासा भवति ।

**विशेषः- जिह्वामूलीयस्वरूपं यथा-** क----ख इति कखाभ्यां प्रागर्धबिसर्गसदृशः--जिह्वामूलीय इति कथ्यते।

**उपध्मानीयश्च यथा-** प--फ इति पफाभ्यां प्रागर्धविसर्गसदृशः---उपध्मानीयः भवति । क वर्णात् पूर्व खवर्णात् पूर्वं च पूर्ववर्णोत्तरवर्तिविसर्गस्य रूपान्तरम् अर्धविसर्गसदृशं यद् भवति तद् जिह्वामूलीयः । पवर्णात् फवर्णात् च पूर्व पूर्ववर्णोत्तरवर्तिविसर्गस्य रूपान्तरं अर्धविसर्गसदृशम् यद् भवति तद् उपध्मानीयः कथ्यते। एतेषाम् आधिक्येन प्रयोगः ओजोगुणव्यञ्जिकायां रचनायाम् अपेक्ष्यते।

एतदतिरिक्तम् अस्याम् ओजस्विरचनायां झय् वर्णानां (झ-भ-घ-ढ-ध-जब-ग-ड-द-ख-फ-छ-ठ-थ-च-ट-त-क-प- एतेषां झाय् प्रत्याहारस्थवर्णानाम्) प्रायशः प्रयोगः अपेक्ष्यते ।

झय्प्रत्याहारस्थवर्ण-रवर्णान्यतर घटितसंयोगात् पूर्ववर्तिना ह्रस्वस्वराणां निकटनिकटतया प्रयोगः ओजस्विरचनायां भवेत्।

एषा रचना दीर्घदीर्घतरसमस्तपदैः भूयिष्ठा भवेत्। एवं दीर्घसमासात्मिका इयम् ओजोगुणव्यञ्जिका रचना भवति।

अस्याम् ओजस्विरचनायाम् टवर्गभिन्नाना वर्गाणां प्रथमतृतीयव्यञ्जन-वर्णाः यदि संयोगघटकाः न स्युः तर्हि तेषां व्यञ्जनानाम् न तु अनुकूलता न च प्रतिकूलता तत्र भवति । अर्थात् संयोगघटकाभावे एते वर्णा अत्र उदासीनाः भवन्ति। परन्तु यदि एते वर्णाः संयोगघटकाः भवन्ति तदा ते ओजोगुणस्थ अनुकूला एव भवन्ति ।

एकमेव अनुस्वारपरसवर्णा अपि यदि संयोगघटकाः सन्ति तदा तेषां रचनायाम् अस्याम् अनुकूलता एव स्वीकृता । तेषामपि अनुस्वार-परसवर्णादीनां संयोगघटकाभावे उदासीनता एव अत्र ओजस्विरचनायां मन्तव्या।

ओजोगुणस्य अभिव्यञ्जिकायाः रचनायाः स्वरूपं भवान् पूर्वमपि साहित्यदर्पणे पठितवान्-

**"वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ॥**

**उपर्यधोद्वयोर्वा सरेफाष्टठडढैः सह ।**

**शकारश्च षकारश्च तस्य व्यञ्जकतां गताः " ॥**

**तथा समासो बहुलो घटनौद्धत्यशालिनी।**[2]

तथा च काव्यप्रकाशे अपि भवान् अपठत् योगः आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः । टादिः शषौ वृत्तिदैर्ध्य गुम्फ उद्धत ओजसि ॥ (काव्यप्रकाशः ८/७५) अत्र उभयत्रापि समान एव भावः प्रदर्शितः आचार्याभ्याम् । ध्वन्यालोके सविशेष गुणस्यास्य निरूपणं विद्यते । तदपि भवता पठितम्। तद्यथा-

वर्गस्य प्रथम-तृतीयवर्णाभ्यां द्वितीय-चतुर्थयोः वर्णयोः योगः भवेत् । रेफेण उपरि, अधः उभयथा वा यस्य कस्यचिद् वर्णस्य योगः भवेत् । द्वयोः तुल्यवर्णयोः तेन वर्णेन तस्यैव वर्णस्य सम्बन्धः भवेत् । णवर्जस्य वास्य वर्णानां प्रयोग भवेत। शकारषकारयोः प्रयोगः भवेत् । दीर्घसमासः भवेत् । रचना च विकटा भवेत्। एतादृशी रचना ओजोगुणमभिव्यनक्ति

**ओजस्विरचनाया उदाहरणम्-**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥**[3]

अस्मिन् श्लोके 'ओजः' (ओजस्) गुणस्य प्राधान्यम् वर्तते। ओजोगुणे समासानां बाहुल्यम्, गाम्भीर्यम्, कथने च सामर्थ्यम् भवति। अत्र 'देवतात्मा', 'नगाधिराजः', 'पूर्वापरौ तोयनिधी', 'मानदण्डः' इत्यादिभिः समासैः हिमालयस्य विशालं साम्राज्योचितं च रूपम् चित्रितम्, यत् ओजस्विन्याः शैल्याः द्योतकम् अस्ति।

**३. प्रसादस्य व्यञ्जिका रचनाः-** माधुर्यगुणस्य, ओजोगुणस्य च व्यञ्जिकाया रचनायाः स्वरूपम् अत्रैव भवान् पठितवान् । इदानीम् अस्मिन्नेव क्रमे भवान् प्रसादगुणस्य अभिव्यञ्जिकाया रचनायाः स्वरूपं पठतु। अयं प्रसादः यस्यां रचनायां भवति सा रचना प्रसन्नरचनेति कथ्यते ।

**प्रसन्नरचनायाः लक्षणम्-** माधुर्यस्य व्यञ्जिकाया रचनाया ओजोगुणस्य व्यञ्जिकायाश्च रचनायाः केचन विशेषा उक्ताः पण्डितराजेन किन्तु प्रसादगुणव्यञ्जिकाया रचनायाः स्वरूपनिरूपणप्रसङ्गे कोऽपि वर्गः वर्णविशेषश्च रचनासङ्घटकरूपेण न निर्दिष्टः। अत्र तु केवलं सामान्यः निर्देश एव कृतः। स हि प्रसादगुणप्रकाशकः । स च यथा-

या रचना श्रवणमात्रेण एव वाक्यार्थं हस्ततलगतं बदरफलमिव सर्वात्मना प्रकाशयति, सा एव प्रसादगुणस्य अभिव्यञ्जिका रचना भवति । यथैव किमपि वाक्यं श्रुतं तथैव तत्समकालमेव झटिति तस्य वाक्यस्य अर्थः श्रोतुः कृते अनायासतया स्पष्टः भवति, इत्येव प्रसन्नरचनायाः स्वरूपम्।

अयं प्रसादगुणः सर्वसाधारणो गुणो मन्यते । यतोहि तस्य गुणस्य स्थितिः सर्वासु रचनासु सर्वेषु रसेषु च सम्भवति। सरला समासरहिता वाक्यावली प्रसादगुणस्य व्यञ्जने सामर्थ्यं भजते ।

एवं प्रतिपन्नं भवति यत् यस्या रचनायाः श्रवणमात्रेणैव अनायासतया अर्थबोधो जायते सा एव प्रसन्नरचना भवति । पूर्वं यथा भवान् पठितवान् कदाचित् साहित्यदर्पणस्य पाठे, अतः स्मरणीयं तत्- साहित्यदर्पणकारस्य विश्वनाथस्य प्रसादगुणलक्षणं, तेन एतत् अधिकं स्पष्टं भवति । तल्लक्षणं यथा-

**चित्तं व्याप्नोति यः शीघ्रं शुष्केन्धनमिवानलः।**

**स प्रसादः समस्तेषु रसेषु रचनासु च ॥**

**शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः ॥**[4]

यथा अग्निः शुष्कम् इन्धनं तत्क्षणमेव व्याप्य दहति तथैव यत् वाक्यं श्रवणेन सहैव श्रोतुः चित्तमर्थभावनया व्याप्नोति स एव प्रसादगुणः । प्रसादगुणस्य व्यञ्जकाः ते एव शब्दाः भवितुमर्हन्ति ये श्रवणसमकालमेव अर्थं बोधयन्ति । एवमेव च काव्यप्रकाशस्य ग्रन्थे दृश्यते यत्-

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।**

**साधारणः समग्राणां स प्रसादो गुणो मतः ॥**[5]

अत्रापि श्रवणमात्रेण शब्दादीनामर्थबोधकत्वम्, समग्राणाम् इत्यनेन समस्तेषु रसेषु रचनासु च साधारणतया विद्यमानत्वम्, एवं प्रसादगुणस्य वैशिष्ट्यं स्वरूपञ्च निरूपितमस्ति ।

पण्डितराजः जगन्नाथः अपि अयं च सर्वसाधारणो गुणः इति प्रसादगुणविषयकं कथनं विधाय एतदेव स्पष्टीकरोति यत् प्रसादस्य स्थितिः सर्वेषु रसेषु, सर्वासु च रचनासु च सामान्यतया भवति ।

**प्रसादगुणस्य उदाहरणश्लोकौ-**

**प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः ।**

**विभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताऽधराभ्यः ॥[6]**

अत्र प्रसादगुणः प्रधानम्, किन्तु विषयवस्तुनः हिमालयवर्णनस्य सुकुमारतया 'माधुर्यगुणस्यापि' झलकी दृश्यते। यद्यप्यर्थः स्पष्टः, तथाप्यत्र कोमलतायाः सौन्दर्यस्य च विशेषः प्रभावः, अतः प्रसादगुणो गौणः।

**अवधानपरे चकार सा प्रलयान्तोन्मिणिते विलोचने ।**

**न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम् ॥[7]**

महाकविकालिदासविरचिते कुमारसम्भवमहाकाव्येऽस्मिन् मनोहरे श्लोके 'प्रसादगुणः' प्रधानम्। काव्यशास्त्रानुसारं, यां रचनां श्रुत्वा पठित्वा च सहसा तस्या अर्थः प्रयासं विनैव मनसि तथा स्पष्टो भवति यथा शुष्के इन्धने अग्निः क्षिप्रं प्रसरति, तत्र प्रसादगुणो भवति।

**उपसंहारः-** महाकविकालिदासविरचिते कुमारसम्भवमहाकाव्ये गुणवादस्य समीक्षायां पर्यालोचनं कृतम्। प्राचीनभारतीयचिन्तकैः राजनीतिक्षेत्रे षष्टिः गुणाः चर्चिताः, परन्तु काव्यशास्त्रे गुणशब्दः भिन्नार्थकः। भारतीयदर्शनेषु न्यायवैशेषिकादिषु गुणानां स्वरूपं निरूपितम्, तथैव काव्यशास्त्रेऽपि मम्मटभट्टादिभिः माधुर्यौजःप्रसादाख्याः त्रय एव गुणाः प्रधानतया स्वीकृताः।

कालिदासस्य कुमारसम्भवे गुणानां प्रयोगः काव्यशास्त्रीयलक्षणानुगुणः प्रतिभाति। माधुर्यगुणस्य व्यञ्जिका रचना टवर्गवर्जिता, मृदुवर्णबहुला, असमासा या दृश्यते, तस्या उदाहरणं षष्ठसर्गे 'अध्यापितस्योशनसापि नीतिम्' इत्यत्रोपलभ्यते। ओजोगुणस्य व्यञ्जिका रचना टवर्गबहुला, दीर्घसमासात्मिका, वीररसप्रधाना च; तस्योदाहरणं प्रथमसर्गे 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति श्लोकः। प्रसादगुणः सर्वसाधारणः, यत्र श्रवणमात्रेणार्थबोधः स्पष्टो भवति; तस्योदाहरणं नवमे श्लोके 'प्रसीद विश्राम्यतु वीर वज्रं' इत्यत्र तथा द्वितीयसर्गे 'अवधानपरे चकार सा' इत्यत्र च दृश्यते।

## सन्दर्भ-सूची

1.कुमा.सम्भ-१/६ 2. सा.द.८/५-६-७ 3. कुमा.सम्भ-१/१

4. सा.द. ८/८ 5. काव्यप्रकाशः ८/१६ 6. कुमा.सम्भ- १/९

7. कुमा.सम्भ- २/२

## सन्दर्भ-ग्रन्थ-सूची

1. काव्यालङ्कारसूत्रवृत्तिः- चौखाम्बा संस्कृत संस्थान् - वारणासी 1973

2. काव्यादर्शः- आन्ध्रप्रदेश साहित्य अकाडमी- हैदराबाद् -1980

3. काव्यप्रकाशः - सुरभारती समितिः- हैदराबाद् - 1990
4. ध्वन्यालोकः - मोती लालू बनारसी दास् - दिल्ली -1958
5. कविकर्णरसायनम् प्राच्यविद्यासंशोधनालयः मैसूरुविश्व-विद्यालयः मैसूरु 1975
6. Sri Aurobindo. Notes on the Kumarasambhavam. Centenary Edition, Vol III, Pondicherry: Sri Aurobindo Ashram, 1972.
7. Kalidasa. Kalidasa's Kumarasambhava, Cantos I-VIII. Edited with the commentary of Mallinatha, a Literal English Translation, Notes and Introduction by M.R. Kale. Delhi: Motilal Banarsidass Publishers, 1981.
8. Kalidasa. Kumarasambhavam of Kalidasa, Fifth Canto. Text and English Translation, Edited by Dr Rabindra Kumar Panda, with Introduction, Text, English and Hindi translations and Notes. Delhi: Bharatiya Kala Prakashan, 1999.
9. on Kalidasa and his other works - Aggarwal, Vinod. The Imagery of Kalidasa. Delhi: Eastern Book Linkers, 1985.
10. Krishnamoorthy, K. Kalidasa. New Delhi: Sahitya Academi, 1994.